आस्तरणमार्द्रवासः प्रावरणं चार्द्रमेव स्यात् ।
तेन पिपासा शाम्यति दाहश्चोग्रोऽपि देहिनां नियतम् ॥ ३ ॥
गोस्तनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः ।
नियतं नासिकापीतैस्तृष्णा शाम्यति दारुणा ॥ ४ ॥
वैशद्यं जनयत्यास्ये सन्दधाति मुखे जलम् ।
तृष्णादाहप्रशमनं मधुगण्डूषधारणम् ॥ ५ ॥
जिह्वातालुगलक्लोमशोषे मूर्द्धनि दापयेत् ।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम् ॥ ६ ॥
दाडिमं वदरं लोध्रं कपित्थं वीजपूरकम् ।
पिष्टा मूर्द्धनि लेपस्तु पिपासादाहनाशनः ॥ ७ ॥
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम् ।
पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति ॥ ८ ॥
गात: सशर्करः पेयो हिमो धान्याकसम्भवः ।
जयेत् तृष्णां तथा दाहं भवेत् स्रोतोविशो-
धनम् ॥ ९ ॥
आमलं कमलं कुष्ठं लाजाश्च वटरोहकम् ।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे ॥
तृष्णां प्रवृद्धां हन्त्येषा मुखशोषञ्च दारुणम् ॥ १० ॥
क्षतोद्भवां रुग्विनिवारणेन
जयेत् क्षतानामसृजश्च पानैः ॥ ११ ॥
क्षयोत्थितां क्षीरजलं निहन्या-
न्मांसोदकं वा मधुरोदकं वा ॥ १२ ॥
आमोद्भवां विल्ववचायुतानां
जयेत् कषायैरथ दीपनानाम् ॥ १३ ॥
गुर्व्वन्नजामुल्लिखनैर्जयेच्च
क्षयं विना सर्व्वकृताञ्च तृष्णाम् ॥
उल्लिखनैः लेखनद्रव्यैः ॥ १४ ॥
स्निग्धेऽन्ने भुक्ते या तृष्णा स्यात्तां गुड़ाम्बुना शमयेत् ।
अतिरोगदुर्ब्बलानां तृष्णां शमयेन्नृणामिहाशु पयः ॥
पयोऽत्र दुग्धम् ॥ १५ ॥
मूर्च्छाच्छर्द्दितृषादाहस्त्रीमद्यभृशकर्षिताः ।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये ॥ १६ ॥
सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत् पुनः ।
तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्-
सितुम् ॥ १७ ॥ * ॥
तृष्यन् पूर्व्वामयक्षीणो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
तस्मात् सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम् ।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्व्विमुच्यते ॥
इति तृष्णाधिकारः ॥” इति भावप्रकाशः ॥
(अथास्याः पथ्यापथ्यनियमः ॥ पथ्यानि यथा,—
“शोधनं शमनं निद्रां स्नानं कवलधारणम् ।
जिह्वाधःसिरयोर्दाहो दीपदग्धहरिद्रया ॥
कोद्रवाः शालयः पेया विलेपी लाजशक्तवः ।
अन्नमण्डो धन्वरसाः शर्करा वागषाड़वा ॥
भृष्टैर्मुद्गैर्मसूरैर्व्वा चणकैर्व्वा कृतो रसः ।
रम्भापुष्पं तैलकूर्चं द्राक्षापर्पटपल्लवाः ॥
कपित्थं कोलमम्लीका कुष्माण्डकसमोदिका ।
खर्ज्जूरं दाड़िमं धात्री कर्कटी नलदाम्बु च ॥
जम्बीरं करमर्द्दश्च वीजपूरं गवां पयः ।
मधूकपुष्पं ह्रीवेरं तिक्तानि मधुराणि च ॥
वालतालाम्बु शीताम्बु पयः पेटीप्रपानकम् ।
माक्षिकं सरसां तोयं शताह्वा नागकेशरम् ।
एलाजातीफलं पथ्या कुस्तुम्बुरु च टङ्कणम् ।
घनसारो गन्धसारः कौमुदी शिशिरानिलः
चन्दनार्द्रप्रियाश्लेषो रत्नाभरणधारणम् ।
हिमाम्बुलेपनञ्च स्यात् पथ्यमेतत्तृषातुरे ॥”
अपथ्यानि यथा,—
“स्नेहाञ्जनस्वेदनधूमपान-
व्यायामनस्यातपदन्तकाष्ठम् ।
गुर्व्वन्नमम्लं लवणं कषायं
कटु क्षियं दुष्टजलानि तीक्ष्णम् ॥
एतानि सर्व्वाणि हिताभिलाषी
तृष्णातुरो नैव भजेत कदाचित् ॥”
इति वैद्यकपथ्यापथ्यविधिग्रन्थे तृष्णाधिकारे ॥)

तृष्णाक्षयः, पुं, (तृष्णाया विषयलिप्सायाः क्षयो नाशो यत्र ।) शान्तिः । इति हेमचन्द्रः । २ । २१८ ॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम् ।
“यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम् ।
तृष्णाक्षयसुखस्यैव कलां नार्हति षोड़शीम् ॥”
तृष्णायाः पिपासायाः क्षयः ) पिपासानाशश्च ॥

तृष्णारिः, पुं, (तृष्णायाः पिपासायाः अरिः शत्रुः ।) पर्पटः । इति राजनिर्घण्टः ॥

तृह, ध ऊ श हिंसे । इति कविकल्पद्रुमः ॥ (रुधां-तुदां च-परं-सकं-वेट् ।) सप्तमस्वरी । ध, तृणेढि । (यथा, भट्टिः ।
“तृणेढु रामः सह लक्ष्मणेन ॥”)
ऊ, अतर्हीत् अतृक्षत । श, तृहति । इति दुर्गादासः ॥

तॄ, तर । अभिभवे । प्लुत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-प्लुतौ अकं-सेट् ।) तरः । प्लवनपूर्व्वकदेशान्तरगमनम् । प्लुतिर्मज्जनाभावः । तरति नदीं भेलया पान्थः । तरति सकलदुःखं वामनं भावयद्वयः । तरति शुष्ककाष्ठं जले मज्जति नेत्यर्थः ॥ इति दुर्गादासः ॥

ते, त्व, त्वया, इति त्रिकाण्डशेषः ॥ (गौरी । यथा, सङ्गीतदामोदरः ।
“तेशब्देनोच्यते गौरी नशब्देनोच्यते हरः ।
तेन माङ्गलिकत्वाय शब्दस्तेन इति स्मृतः ॥”)

तेजः, [स्] क्ली (तेजयति तेज्यतेऽनेन वा । तिज निशाने + “सर्व्वधातुभ्योऽसुन् ।” उणां । ४ । १८८ । इति असुन् ।) दीप्तिः । (यथा, माघे । २ । ६२ ।
“अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥”)
प्रभावः । (यथा, महाभारते । ६ । १४ । ४८ ।
“तस्मान्नूनं महावीर्य्याद्भार्गवाद्युद्धदुर्म्मदात् ।
तेजोवीर्य्यबलैर्भूयान् शिखण्डी द्रुपदात्मजः ॥”)
पराक्रमः । (यथा, महाभारते । ३ । २८ । ६ ।
“न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा ।
इति तात ! विजानीहि द्वयमेतदसंशयम् ॥”)
रेतः । इति मेदिनी । से, २५ ॥ (यथा, रघुः ।
“अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ॥”
“तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्वायुरुदीरयति । ततस्तेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्त्तवेन ।”
“तत्र तेजोधातुः सर्व्ववर्णानां प्रभवः स यदा गर्भोत्पत्तावब्धातुप्रायो भवति तदा गर्भं गौरं करोति पृथिवीधातुप्रायः कृष्णं पृथिव्याकाशधातुप्रायः कृष्णश्यामं तोयाकाशधातुप्रायो गौरश्यामम् ॥” इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥ सारः । यथा, सुश्रुते । १ । १५ ।
रसादीनां शुक्रान्तानां धातूनां यत् परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते स्वशास्त्रसिद्धान्तात् ॥”
“यत् परं तेजः इति यदुत्कृष्टं सारः ।”
इति तट्टीका ॥
शारीराग्निसम्भूतपदार्थविशेषः । तद्यथा,—
“तेजोऽप्याग्नेयं क्रमशः पच्यमानानां धातूनामभिनिर्वृत्तमन्तरस्थं स्नेहजातं वसाख्यं स्त्रीणां विशेषतो भवति तेन मार्द्दवसौकुमार्य्यमृदुल्परोमतोत्साहदृष्टिस्थितिपक्तिकान्तिदीप्तयो भवन्ति तत् कषायतिक्तशीतरूक्षविष्टम्भिवेगविघातव्यवायव्यायामव्याधिकर्षणैश्च विक्रियते ॥”
इति च सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये ॥)
त्विट् । (देहजकान्तिः । यथा, वाजसनेयसंहितायाम् । १ । ३१ ।
“तेजोऽसि शुक्रमस्यमृतमसि ।
धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥”
“हे आज्य ! त्वं तेजोऽसि शरीरकान्तिहेतुत्वात्तेजस्त्वम् ।” इति महीधरः ॥) नवनीतम् । अग्निः । इति हेमचन्द्रः । २ । १५ ॥ सुवर्णम् । मज्जा । पित्तम् । इति राजनिर्घण्टः ॥ असहनम् । यथा, साहित्यदर्पणे । ३ । ६४ ।
“अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥”
पञ्चमहाभूतान्तर्गततृतीयमहाभूतम् । यथा,—
“तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते ।
अधिभूतं ततो रूपं सूर्य्यस्तत्राधिदैवतम् ॥”
इत्याश्वमेधिकपर्व्व ॥
अस्य धर्म्माः रूपम् १ द्रवत्वम् २ प्रत्यक्षयोगित्वम् ३ ॥ अस्य गुणाः । स्पर्शः १ संख्या २ परिमाणम् ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ रूपम् ९ द्रवः १० वेगः ११ । अस्य नैमित्तिकद्रवत्वम् । अस्य स्पर्श उष्णः । रूपं शुक्लभास्वरम् । इदं द्विधा । परमाणुस्वरूपं नित्यम् । सावयवमनित्यम् । अनित्यं त्रिधा । देहः इन्द्रियं विषयः । इति